*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[10]**

1. वीरवरः कस्मात् देशात् आगतः आसीत्?
   (A) विदेह नगरात् (B) अज्ञातदेशात् (C) कर्णाटदेशात् (D) मगधदेशात्

   **उत्तर :** (B) अज्ञातदेशात्

2. वीरवरस्य वेतनं कति स्वर्णमुद्राः आसन्?
   (A) द्विशतम् (B) त्रिशतम् (C) चतुःशतम् (D) पञ्चशतम्

   **उत्तर :** (C) चतुःशतम्

3. शोभावती नगर्याः राज्ञः नाम किम् आसीत्?
   (A) वीरवरः (B) शूद्रकः (C) शक्तिधरः (D) नारायणः

   **उत्तर :** (B) शूद्रकः

4. देव्या नाम किम् आसीत्?
   (A) दुर्गा (B) लक्ष्मीः (C) सर्वमंगला (D) सरस्वती

   **उत्तर :** (C) सर्वमंगला

5. राजलक्ष्मीः कस्मिन् समये वीरवरं मिलितवती?
   (A) प्रातःकाले (B) मध्याह्ने (C) अर्धरात्रौ (D) सायंकाले

   **उत्तर :** (C) अर्धरात्रौ

6. वीरवरस्य सुतस्य नाम किम् आसीत्?
   (A) वीरसनः (B) शक्तिधरः (C) देवदत्तः (D) धर्मपालः

   **उत्तर :** (B) शक्तिधरः

7. वीरवरस्य पत्न्याः नाम किम् आसीत्?
   (A) सीता (B) वेदवती (C) सुमित्रा (D) देवकी

   **उत्तर :** (B) वेदवती

8. वीरवरः स्ववेतनस्य कतिभागं दरिद्रेभ्यः यच्छति स्म?
   (A) अर्धम् (B) एकचतुर्थांशम् (C) त्रिभागम् (D) सर्वम्

   **उत्तर :** (B) एकचतुर्थांशम्

9. “धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्” इति श्लोके कः उत्सृजेत्?
   (A) मूर्खः (B) प्राज्ञः (C) दुष्टः (D) कृपणः

   **उत्तर :** (B) प्राज्ञः

10. राजा शूद्रकः वीरवराय किं प्राददत्?
    (A) धनम् (B) अश्वम् (C) कर्णाट प्रदेशम् (D) रत्नानि

    **उत्तर :** (C) कर्णाट प्रदेशम्

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[6]**

11. राजलक्ष्मीः कृष्णचतुर्दश्यां ____________ वीरवरं मिलितवती।(अर्धरात्रौ / मध्याह्ने)

**उत्तर :** अर्धरात्रौ

12. वीरवरः प्रतिदिनं ____________ देव! इति वेतनं प्राप्नोत्।(सुवर्ण चतुष्टयम् / सुवर्ण द्विशतम्)

**उत्तर :** सुवर्ण चतुष्टयम्

13. शूद्रको नाम ____________ महीपतिः प्रतिवसति स्म।(महापराक्रमी / दयालु)

**उत्तर :** महापराक्रमी

14. यदि वीरवरः स्वप्रियं वस्तु ____________ समर्पयति तर्हि राजा जीविष्यति।(सहास वदनेन / अन्यमनः)

**उत्तर :** सहास वदनेन

15. राजा शूद्रकः वीरवराय ____________ प्रदेशम् अयच्छत्।(गुर्जरदेशम् / कर्णाटम्)

**उत्तर :** कर्णाटम्

16. वीरवरस्य दुहितुः नाम ____________ आसीत्।(वीरवती / सुकन्या)

**उत्तर :** वीरवती

*** स्तम्भयोः मेलनं कुरुत।** **[8]**

| **अ** | **ब** |
|---|---|
| 17. पृष्ठतः | (क) आचरण |
| 18. प्रवृत्तिः | (ख) पीछे से |
| 19. तिमिरे | (ग) सोचा |
| 20. व्यचिन्तयत् | (घ) अन्धकार में |

**उत्तर :** (1 - ख, 2 - क, 3 - घ, 4 - ग)

| **अ** | **ब** |
|---|---|
| 21. वर्तनम् | (क) शस्त्रयुक्तः |
| 22. धृतायुधः | (ख) वेतन |
| 23. अहर्निशम् | (ग) गहन |
| 24. सूचिभेद्ये | (घ) दिन-रात |

**उत्तर :** (1 - ख, 2 - क, 3 - घ, 4 - ग)

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत।** **[10]**

25. देव्याः प्रसन्नतायाः कारणं किम् आसीत्?

**उत्तर :** वीरवरस्य त्यागः भक्तिश्च।

26. राजलक्ष्म्याः वचनात् शूद्रकस्य आयुः कति दिनानि आसन्?

**उत्तर :** त्रीणि दिनानि।

27. वीरवरः कस्मै सेवाम् अकरोत्?

**उत्तर :** राज्ञे शूद्रकाय।

28. वीरवरस्य सामग्री का आसीत्?

**उत्तर :** इमौ बाहू एषः खड्गश्च।

29. शूद्रकस्य नगर्याः नाम किम् आसीत्?

**उत्तर :** शोभावती।

30. अर्धरात्रौ का रोदितवती?

**उत्तर :** राजलक्ष्मीः।

31. राजा कस्मै प्रदेशं प्रादात्?

**उत्तर :** वीरवराय।

32. वीरवरः काम् देवीम् उपासितवान्?

**उत्तर :** सर्वमंगलाम्।

33. शूद्रकः कः आसीत्?

**उत्तर :** महीपतिः।

34. वीरवरस्य पुत्रस्य नाम किम्?

**उत्तर :** शक्तिधरः।

*** पूर्णवाक्येन उत्तरं लिखत।** **[36]**

35. राजलक्ष्मीः कुत्र सुखेन अवसत्?

**उत्तर :** राजलक्ष्मी शूद्रकस्य भुजच्छायायां सुखेन अवसत्।

36. राज्ञः शूद्रकस्य 'का ते सामग्री?' इति प्रश्नस्य उत्तरं वीरवरः किम् अयच्छत्?

**उत्तर :** शूद्रकस्य ''का ते सामग्री?'' प्रश्नस्य उत्तरं ''इमौ बाहू, एष खड्गश्च'' वीरवरः अयच्छत्।

37. वीरवरः कस्य समीपं गन्तुम् इच्छति स्म?

**उत्तर :** वीरवरः स्वामिनः समीपं गन्तुम् इच्छति स्म।

38. वीरवरः स्वगृहं कदा गच्छति स्म?

**उत्तर :** यदा राजा स्वयं आदिशति तदा गच्छति स्म।

39. वीरवरः स्ववेतनस्य अर्धं केभ्यः यच्छति स्म?

**उत्तर :** वीरवरः स्ववेतनस्य अर्धं देवेभ्यः यच्छति स्म।

40. शूद्रकः कीदृशः राजा आसीत्?

**उत्तर :** शूद्रकः महापराक्रमी नानाशास्त्रवित् पूतचरित्रः राजा आसीत्।

41. अन्ते राजा वीरवराय किम् प्रादात्?

**उत्तर :** अन्ते राजा वीरवराय कर्णाट प्रदेशं प्रादात्।

42. राजलक्ष्मीः किमर्थं रोदनं कृतवती?

**उत्तर :** देव्याः अपराधेन राजा शूद्रकः त्रिषु दिनेषु मरिष्यति इति ज्ञात्वा राजलक्ष्मीः रोदनं कृतवती।

43. वीरवरः स्ववेतनस्य अर्धं केभ्यः यच्छति स्म?

**उत्तर :** वीरवरः स्ववेतनस्य अर्धं देवेभ्यः यच्छति स्म।

44. वीरवरः स्ववेतनस्य कतिभागं पत्न्यै यच्छति स्म?

**उत्तर :** वीरवरः स्ववेतनस्य एकचतुर्थांशं (अवशिष्टं भागं) पत्न्यै यच्छति स्म।

45. शक्तिधरः किमर्थं आत्मसमर्पणाय सिद्धः अभवत्?

**उत्तर :** शक्तिधरः स्वस्वामिनः राज्ञः शूद्रकम् जीवन रक्षणार्थं आत्मसमर्पणाय सिद्धः अभवत्।

46. शूद्रकः कीदृशः राजा आसीत्?

**उत्तर :** शूद्रकः महापराक्रमी, नानाशास्त्रवित्, पूतचरित्रः महीपतिः आसीत्।

47. राजलक्ष्म्याः दु:खस्य कारणं श्रुत्वा बद्धाञ्जलिः वीरवरः किम् अवदत्?

**उत्तर :** तदाकर्ण्य प्रणिपत्य - भगवति! अस्त्यत्र कश्चिदुपायो येन भगवत्याः पुनरिह चिरवासो भवति, सुचिरं जीवति च स्वामि इति अवदत्।

48. वीरवरस्य दुहितुः नाम किम्?

**उत्तर :** वीरवरस्य दुहितुः नाम् वीरवती आसीत्।

49. वीरवरस्य पृष्ठतः कः अगच्छत्?

**उत्तर :** वीरवरस्य पृष्ठतः शूद्रकः अगच्छत्।

50. "धनानि जीवितञ्चैव परार्थे प्राज्ञः उत्सृजेत्" इति श्लोकस्य भावं स्पष्टी कुरु।

**उत्तर :** अस्मिन् श्लोके उक्तम् अस्ति यत् बुद्धिमान् जनः परोपकाराय धनं जीवितञ्च त्यक्तुं सिद्धः भवेत्। यतोहि शरीरस्य विनाशः निश्चितः अस्ति, अतः सत्कार्याय तस्य समर्पणं श्रेष्ठम्। वीरवरेण अपि एतत् प्रदर्शितम्। सः स्वस्वामिरक्षणार्थम् सर्वस्वं त्यक्तवान्। एतादृशः त्यागः सर्वदा स्मरणीयः भवति।

51. राज्ञः शूद्रकस्य चरित्रं वर्णयत।

**उत्तर :** राजा शूद्रकः महापराक्रमी, नानाशास्त्रवित्, पूतचरित्रश्च आसीत्। प्रथमं तस्य सन्देहः आसीत्, परं मन्त्रिणः परामर्शेन सः वीरवरस्य परीक्षां कृतवान्। वीरवरस्य त्यागं दृष्टवा सः अपि आत्मसमर्पणाय सिद्धः अभवत्। सः भृत्यवत्सलः राजा आसीत्। अन्ते सः वीरवराय समग्रकर्णाटप्रदेशं प्रादात्। एतेन तस्य उदारता प्रमाणिता।

52. वीरवरस्य चरित्रस्य विशेषताम् लिखत।

**उत्तर :** वीरवरः एकः कर्तव्यनिष्ठः, स्वामिभक्तः एवं त्यागशीलः व्यक्तिः आसीत्। सः स्ववेतनस्य अर्धं देवकार्ये, एकचतुर्थांशं दरिद्रेभ्यः यच्छति स्म। सः दिवारात्रं राजद्वारे सेवां करोति स्म। स्वामिरक्षणार्थं सः स्वपुत्रं, स्वपत्नीं दुहितरं, स्वात्मानञ्च समर्पितवान्। एतादृशः त्यागः परोपकार भावना च अनुकरणीयाः सन्ति।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत।** **[6]**

53. वीरवरः <u>राजपुत्रः</u> आसीत्।

**उत्तर :** वीरवरः **कः** आसीत्?

54. वीरवरस्य वेतनं <u>सुवर्णशतचतुष्टयम्</u> आसीत्।

**उत्तर :** वीरवरस्य वेतनं **किम्** आसीत्?

55. <u>देवी सर्वमंगला</u> सर्वेभ्यः जीवनदानम् अदात्।

**उत्तर : का** सर्वेभ्यः जीवनदानम् अदात्?

56. <u>मन्त्रिणां</u> वचनात् नरपतिना राजपुत्रं नियोजितः।

**उत्तर : केषाम्** वचनात् नरपतिना राजपुत्रं नियोजितः?

57. <u>राजपुत्रः</u> सूचिभेद्ये तिमिरे एकाकी न गन्तुमर्हति।

**उत्तर : कः** सूचिभेद्ये तिमिरे एकाकी न गन्तुमर्हति?

58. राजा शूद्रकः <u>शोभावती नगर्यां</u> राज्यम् अकरोत्।

**उत्तर :** राजा शूद्रकः **कुत्र** राज्यम् अकरोत्?

*** अधोलिखितानि क्रम रहित वाक्यानि घटना क्रमानुसारं संयोजनयत। [6]**

59. (i) मन्त्रिणः परामर्शेन राजा तं परीक्षणार्थं नियोजयति।
(ii) वीरवरः वृत्त्यर्थं शूद्रकस्य समीपम् आगच्छति।
(iii) एकदा अर्धरात्रे करुणरोदन ध्वनिः श्रूयते।
(iv) वीरवरः दिवारात्रं राजद्वारे सेवां करोति।
(v) राज्यलक्ष्मी उपायं सूचयति-प्रियवस्तुसमर्पणम्।
(vi) वीरवरः राज्यलक्ष्मीम् मिलति, सा राज्ञं मृत्योः विषये कथयति।

**उत्तर :** (ii) वीरवरः वृत्त्यर्थं शूद्रकस्य समीपम् आगच्छति।
(i) मन्त्रिणः परामर्शेन राजा तं परीक्षणार्थं नियोजयति।
(iv) वीरवरः दिवारात्रं राजद्वारे सेवां करोति।
(iii) एकदा अर्धरात्रे करुणरोदन ध्वनिः श्रूयते।
(vi) वीरवरः राज्यलक्ष्मीम् मिलति, सा राज्ञं मृत्योः विषये कथयति।
(v) राज्यलक्ष्मी उपायं सूचयति-प्रियवस्तुसमर्पणम्।

60. (i) वीरवरः सपरिवारः सर्वस्वसमर्पणं करोति।
(ii) सर्वे देव्याः समीपं गच्छन्ति, शक्तिधरः आत्मसमर्पणाय सिद्धः भवति।
(iii) राजा शूद्रकः अपि सर्वस्व समर्पणाय सिद्धः भवति।
(iv) देवी सर्वमंङ्गला प्रकटीभूय सर्वेभ्यः जीवनदानं ददाति।
(v) राजा वीरवराय कर्णाटप्रदेशं प्रयच्छति।
(vi) वीरवरः गृहम् गत्वा परिवारं प्राबोधयति।

**उत्तर :** (vi) वीरवरः गृहम् गत्वा परिवारं प्राबोधयति।
(ii) सर्वे देव्याः समीपं गच्छन्ति, शक्तिधरः आत्मसमर्पणाय सिद्धः भवति।
(i) वीरवरः सपरिवारः सर्वस्वसमर्पणं करोति।
(iii) राजा शूद्रकः अपि सर्वस्व समर्पणाय सिद्धः भवति।
(iv) देवी सर्वमंङ्गला प्रकटीभूय सर्वेभ्यः जीवनदानं ददाति।
(v) राजा वीरवराय कर्णाटप्रदेशं प्रयच्छति।

*** अधोलिखितशब्दानाम् अर्थान् विलिख्य वाक्येषु प्रयोगं कुरुत। [4]**

61. निर्गतः - ____________

**उत्तर :** निर्गतः - निकल गया/बाहर चला गया।
वाक्य - सः प्रासादात् बर्हि निर्गतः।

62. नैतच्छक्यम् - ____________

**उत्तर :** नैतच्छक्यम् - ये संभव नहीं।
वाक्य - केनापि-प्रकारेण नैतच्छक्यम्?

63. वर्तनम् - ____________

**उत्तर :** वर्तनम् - वेतन।
वाक्य - किम् ते वर्तनम् ?

64. वृत्त्यर्थं - ____________

**उत्तर :** वृत्त्यर्थं - आजीविका पाने के लिए।
वाक्य - वृत्त्यर्थं कस्माद् देशात् आगतवान्?

*** अधोलिखित गद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[28]**

65. वीरवरः - (प्रतिहारं वीक्ष्य) भोः प्रतिहार! वृत्त्यर्थमागतो राजपुत्रोऽस्मि, तस्मान्नय मां स्वामिनः समीपम्।
(ततो दौवारिकः तं प्रभोः समीपम् अनयत्।)
वीरवरः - (प्रणामपुरस्सरं सविनयम्) देव! यदि सौभाग्येन अहं भवतः सेवायां नियोजितः तर्हि यदादिश्यते तत् श्रद्धया पालयिष्यामि।
राजा - किं ते वर्तनम् ?
वीरवरः - प्रतिदिनं सुवर्णशतचतुष्टयं देव!
राजा - का ते सामग्री?
वीरवरः - इमौ बाहू, एष खड्गश्च।
राजा - नैतच्छक्यम् !
( तत् श्रुत्वा वीरवरः राजानं प्रणम्य राजसभातः निर्गतः।)
I. एकपदेन उत्तरत -
(i) वृत्त्यर्थं कः आगतो?
(ii) “किं ते वर्तनम्?" इति कः पृच्छति?
II. पूर्णवाक्येन उत्तरत -
प्रतिहारं वीक्ष्य वीरवरः किम् अकथयत्?
III. निर्देशानुसारम् उत्तरत -
(i) “ततो दौवारिकः तं प्रभोः समीपम् अनयत्" अत्र तं इति सर्वनाम् पदम् कस्मै प्रयुक्तम्?
(अ) वीरवराय (ब) राज्ञे (स) प्रतिहाराय (द) कोऽपि न
(ii) 'वीक्ष्य' इति पदे कः प्रत्ययः?
(अ) यत् (ब) इक्ष् (स) य (द) ल्यप्
(iii) "अहम् भवतः सेवायां नियोजितः तर्हि यदादिश्यते पालयिष्यामि" इत्यत्र अव्यय पदं किम्?
(अ) भवतः (ब) अहम् (स) आदिश्यते (द) तर्हि

**उत्तर :** I. (i) राजपुत्रवीरवरः
(ii) राजा
II. प्रतिहारं वीक्ष्य वीरवरः अवदत् - " भोः प्रतिहार ! वृत्त्यर्थम् आगतो राजपुत्रः अहम् अस्मि, तस्मात् माम् स्व स्वामिन् समीपम् नय।”

III. (i) (अ) वीरवराय
(ii) (द) ल्यप्
(iii) (द) तर्हि

66. आसीत् शोभावती नाम काचन नगरी। तत्र शूद्रको नाम महापराक्रमी नानाशास्त्रवित् पूतचरित्रः महीपतिः प्रतिवसति स्म। अथैकदा वीरवरनामा राजपुत्रः वृत्त्यर्थं कस्मादपि देशाद् राजद्वारमुपागच्छत्। तेन सह वेदरता नाम तस्य पत्नी, शक्तिधरो नाम सुतः, वीरवती नाम कन्या च समायाताः।
I. एकपदेन उत्तरत —
(i) राजपुत्रः किमर्थं राजद्वारमुपागच्छत्?
(ii) नानाशास्त्रवित् पूतचरित्रः च कः आसीत्?
II. पूर्णवाक्येन उत्तरत —
वीरवरेण सह के-के समायाताः?
III. निर्देशानुसारम् उत्तरत —
(i) "पूतचरित्रः" इति पदस्य अत्र विशेष्यपदं किम् प्रयुक्तम् ?
(अ) शूद्रकः (ब) वीरवरः (स) शक्तिधरः (द) न कोऽपि
(ii) "तेन सह वेदरता" इत्यत्र "तेन" इति सर्वनाम् स्थाने संज्ञापदम् किम् अस्ति ?
(अ) वीरवरेण (ब) शूद्रकेन (स) महीपतिना (द) शक्तिधरेण
(iii) "वीरवरनामा राजपुत्रः वृत्त्यर्थं कस्मादपि देशाद् राजद्वारमुपागच्छत्" इति कर्तृपदस्य क्रियापदं किम् ?
(अ) वृत्त्यर्थं (ब) आसीत् (स) कस्मादपि (द) उपागच्छत्

**उत्तर :** I. (i) वृत्त्यर्थं
(ii) शूद्रकः
II. तेन सह वेदरता नाम तस्य पत्नी, शक्तिधरो नाम सुतः, वीरवती नाम कन्या च समायाताः।
III. (i) (अ) शूद्रकः
(ii) (अ) वीरवरेण
(iii) (द) उपागच्छत्

67. मन्त्री - (तदालोक्य) देव! दिनचतुष्टयस्य वेतनार्पणेन प्रथमं परीक्ष्यतां स्वरूपमस्य वेतनार्थिनो राजपुत्रस्य, किमुपपन्नमेतत् वेतनं न वेति।
अथ मन्त्रिणां वचनात् ताम्बूलदानेन नियोजितोऽसौ राजपुत्रो वीरवरो नरपतिना। स च राजपुत्रः प्रतिदिनं प्रभाते राजदर्शनादनन्तरं स्ववेतनस्य यच्छति देवेभ्यः अर्धम्। स्थितस्य चार्द्धं दरिदेभ्यो ददाति, निक्षिपति च तदवशिष्टं भोज्यविलासव्ययार्थं पत्न्याः हस्ते। ततो धृतायुधः सः राजद्वारमहर्निशं सेवते। यदा राजा स्वयमादिशति तदा याति स्वगृहम्। अथैकदा कृष्णचतुर्दश्यामर्द्धरात्रे स राजा श्रुतवान् करुणरोदनध्वनिं कञ्चन।
राजा - कोऽत्र द्वारि तिष्ठति?
वीरवरः - सेवको वीरवरोऽत्र द्वारि वर्त्तते देव !
राजा - क्रन्दनमनुसर राजपुत्र !
वीरवरः - यथादिशति देवः।
(ततोऽसौ तद्रोदनस्वरम् अनुसरन् प्रचलितः।)
I. एकपदेन उत्तरत -
(i) राजपुत्रः स्ववेतनस्य अर्धम् केभ्यः यच्छति?
(ii) धृतायुधः कः अस्ति?
II. पूर्णवाक्येन उत्तरत -
राजपुत्रः प्रतिदिनं प्रभाते किम् करोति?
III. निर्देशानुसारम् उत्तरत -

(i) “धृतायुधः सः राजद्वारम् अहर्निशं सेवते" अस्मिन् वाक्ये धृतायुधः कस्मै प्रयुक्तम्?

(अ) राजा (ब) वीरवराय (स) मन्त्री (द) न कोऽपि

(ii) “निक्षिपति च तदवशिष्टं भोज्यविलास व्ययार्थं पत्न्याः हस्ते" अत्र "निक्षिपति" क्रिया पदस्य कर्ता कः?

(अ) राजा (ब) पत्नी (स) दरिद्र (द) वीरवरः

(iii) "क्रन्दनमनुसर राजपुत्र!" वाक्यं कः कम् प्रति कथयति?

(अ) राजा वीरवरम् प्रति (ब) वीरवरम् राजा प्रति (स) राजा सेवकं प्रति (द) मन्त्री सेवकं प्रति

**उत्तर :** I. (i) देवेभ्यः

(ii) वीरवरः

II. राजपुत्रः प्रतिदिनं प्रभाते राजदर्शनादनन्तरं स्ववेतनस्य अर्धम् देवेभ्यः यच्छति।

III. (i) (ब) वीरवराय

(ii) (द) वीरवरः

(iii) (अ) राजा वीरवरम् प्रत

68. राजा - (स्वगतम्) नैष गन्तुमर्हति राजपुत्र एकाकी सूचिभेद्ये तिमिरेऽस्मिन्।

तस्मात् अहमपि गच्छामि पृष्ठतोऽस्य, निरूपयामि च किमेतदिति।

(ततो नरपतिः खड्गपाणिः तस्य अनुसरणक्रमेण बहिः निरगच्छत् नगरीद्वारात्।

अथ गच्छता राजपुत्रेण बहिः नगरादालोकिता रोदनपरा कापि सुन्दरी दिव्याभरणभूषिता।)

वीरवरः - का त्वमम्ब! किमर्थं विलपसि?

राजलक्ष्मीः - वत्स! अहमेतस्य भूपालस्य शूद्रकस्य राजलक्ष्मीरस्मि। चिरमेतस्य भुजच्छायायां सुमहता सुखेन निवसामि। साम्प्रतं तु देव्या अपराधेनाद्य प्रभृति तृतीये दिवसे राजा पञ्चत्वं यास्यति, तदाहमनाथा भविष्यामि। तदिदानीं नात्र स्थास्यामीति क्रन्दामि।

वीरवरः - (तदाकर्ण्य प्रणिपत्य) भगवति ! अस्त्यत्र कश्चिदुपायो येन भगवत्याः पुनरिह चिरवासो भवति, सुचिरं जीवति च स्वामी?

राजलक्ष्मीः - अस्ति वत्स! एकैवात्र प्रवृत्तिः, सा चातीव दुःसाध्या।

वीरवरः - (साष्टाङ्गं नमस्कृत्य) अम्ब! कथय, कः सः उपायः दुःसाध्यः?

राजलक्ष्मीः - श्रूयतां पुत्र ! यदि त्वया स्वस्य सर्वतः प्रियं वस्तु सहासवदनेन भगवत्यै सर्वमङ्गलायै उपहारः क्रियेत, तदा पुनर्जीविष्यति राजा शूद्रको वर्षाणां शतम्, अहञ्च सुखेन निवत्स्यामि।

( ततः सा तत्क्षणादेव गताऽदृश्यतां तत्सम्मुखात्।)

I. एकपदेन उत्तरत -

(i) दिव्याभरणभूषिता का?

(ii) "निरगच्छत्" पदे कः उपसर्गः अस्ति?

II. पूर्णवाक्येन उत्तरत -

तृतीये दिवसे कः पञ्चतत्वं यास्यति?

III. निर्देशानुसारम् उत्तरत -

(i) "चिरमेतस्य भुजच्छायायां सुमहता सुखेन निवसामि" अत्र निवसामि क्रिया पदस्य कर्ता कः?

(अ) शूद्रक (ब) वीरवरः (स) राजलक्ष्मी (द) राजा

(ii) “तस्मात् अहमपि गच्छामि पृष्ठतोऽस्य" कः पृष्ठतः गच्छति?

(अ) वीरवरः (ब) राजलक्ष्मी (स) मन्त्री (द) राजा

(iii) "प्रणिपत्य" इति पदे कः प्रत्ययः?

(अ) क्त्वा (ब) यत् (स) ल्यप् (द) तुमुन्

**उत्तर :** I. (i) राजलक्ष्मी

(ii) निर्

II. देव्यापराधेनाद्य प्रभृति राजा तृतीये दिवसे पञ्चतत्वं यास्यति।

III. (i) (स) राजलक्ष्मी

(ii) (द) राजा

(iii) (स) ल्यप्

----- -----